# Shri Kali Shatanama Stotram

# શ્રીકાલીશતનામસ્તોત્રમ્

## Document Information

Text title : kAlIshatanAmastotram 2

File name : kAlIshatanAmastotram.itx

Category : aShTottarashatanAma, devii, devI, dashamahAvidyA

Location : doc_devii

Transliterated by : Shree Devi Kumar

Proofread by : PSA Easwaran

Acknowledge-Permission: Mahaperiaval Trust

Latest update : July 2, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 7, 2024

*sanskritdocuments.org*

# શ્રીકાલીશતનામસ્તોત્રમ્

ભૈરવ ઉવાચ -
શતનામ પ્રવક્ષ્યામિ કાલિકાયા વરાનને ।
યસ્ય પ્રપઠનાદ્વાગ્મી સર્વત્ર વિજયી ભવેત્ ॥ ૧॥

ૐ કાલી કપાલિની કાન્તા કામદા કામસુન્દરી ।
કાલરાત્રિઃ કાલિકા ચ કાલભૈરવપૂજિતા ॥ ૨॥

કુરુકુલ્લા કામિની ચ કમનીયસ્વભાવિની ।
કુલીના કુલકર્ત્રી ચ કુલવર્ત્મપ્રકાશિની ॥ ૩॥

કસ્તૂરીરસનીલા ચ કામ્યા કામસ્વરૂપિણી ।
કકારવર્ણનિલયા કામધેનુઃ કરાલિકા ॥ ૪॥

કુલકાન્તા કરાલાસ્યા કામાર્તા ચ કલાવતી ।
કૃશોદરી ચ કામાખ્યા કૌમારી કુલપાલિની ॥ ૫॥

કુલજા કુલકન્યા ચ કુલહા કુલપૂજિતા ।
કામેશ્વરી કામકાન્તા કુઞ્જરેશ્વરગામિની ॥ ૬॥

કામદાત્રી કામહર્ત્રી કૃષ્ણા ચૈવ કપર્દિની ।
કુમુદા કૃષ્ણદેહા ચ કાલિન્દી કુલપૂજિતા ॥ ૭॥

કાશ્યપી કૃષ્ણમાતા ચ કુલિશાઙ્ગી કલા તથા ।
ક્રીંરૂપા કુલગમ્યા ચ કમલા કૃષ્ણપૂજિતા ॥ ૮॥

કૃશાઙ્ગી કિન્નરી કર્ત્રી કલકણ્ઠી ચ કાર્તિકી ।
કમ્બુકણ્ઠી કૌલિની ચ કુમુદા કામજીવિની ॥ ૯॥

કુલસ્ત્રી કીર્ત્તિકા કૃત્યા કીર્તિશ્ચ કુલપાલિકા ।
કામદેવકલા કલ્પલતા કામાઙ્ગવર્ધિની ॥ ૧૦॥

કુન્તા ચ કુમુદપ્રીતા કદમ્બકુસુમોત્સુકા ।

કાદમ્બિની કમલિની કૃષ્ણાનન્દપ્રદાયિની ॥ ૧૧॥

કુમારીપૂજનરતા કુમારીગણશોભિતા ।
કુમારીરઞ્જનરતા કુમારીવ્રતધારિણી ॥ ૧૨॥

કઙ્કાલી કમનીયા ચ કામશાસ્ત્રવિશારદા ।
કપાલખટ્વાઙ્ગધરા કાલભૈરવરૂપિણી ॥ ૧૩॥

કોટરી કોટરાક્ષી ચ કાશી કૈલાસવાસિની ।
કાત્યાયની કાર્યકરી કાવ્યશાસ્ત્રપ્રમોદિની ॥ ૧૪॥

કામાકર્ષણરૂપા ચ કામપીઠનિવાસિની ।
કઙ્કિની કાકિની ક્રીડા કુત્સિતા કલહપ્રિયા ॥ ૧૫॥

કુણ્ડગોલોદ્ભવપ્રાણા કૌશિકી કીર્તિવર્ધિની ।
કુમ્ભસ્તની કટાક્ષા ચ કાવ્યા કોકનદપ્રિયા ॥ ૧૬॥

કાન્તારવાસિની કાન્તિઃ કઠિના કૃષ્ણવલ્લભા ।
ઇતિ તે કથિતં દેવિ ગુહ્યાદ્ગુહ્યતરં પરમ્ ॥ ૧૭॥

પ્રપઠેદ્ય ઇદં નિત્યં કાલીનામશતાષ્ટકમ્ ।
ત્રિષુ લોકેષુ દેવેશિ તસ્યાસાધ્યં ન વિદ્યતે ॥ ૧૮॥

પ્રાતઃકાલે ચ મધ્યાહ્ને સાયાહ્ને ચ સદા નિશિ ।
યઃ પઠેત્પરયા ભક્ત્યા કાલીનામશતાષ્ટકમ્ ॥ ૧૯॥

કાલિકા તસ્ય ગેહે ચ સંસ્થાનં કુરુતે સદા ।
શૂન્યાગારે શ્મશાને વા પ્રાન્તરે જલમધ્યતઃ ॥ ૨૦॥

વહ્નિમધ્યે ચ સઙ્ગ્રામે તથા પ્રાણસ્ય સંશયે ।
શતાષ્ટકં જપન્મન્ત્રી લભતે ક્ષેમમુત્તમમ્ ॥ ૨૧॥

કાલીં સંસ્થાપ્ય વિધિવત્ સ્તુત્વા નામશતાષ્ટકૈઃ ।
સાધકસ્સિદ્ધિમાપ્નોતિ કાલિકાયાઃ પ્રસાદતઃ ॥ ૨૨॥

ઇતિ શ્રીકાલીશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

દક્ષિણકાલિકાશતનામસ્તવઃ

Proofread by PSA Easwaran

*Shri Kali Shatanama Stotram*

pdf was typeset on November 7, 2024

Please send corrections to *sanskrit@cheerful.com*